# Shri Lakinidevi Stotram

# श्रीलाकिनीदेवीस्तोत्रम्

## Document Information

Text title : Shri Lakinidevi Stotram

File name : lAkinIdevIstotram.itx

Category : devii, ShaTchakrashakti, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# श्रीलाकिनीदेवीस्तोत्रम्

अथैकोनपञ्चाशत्तमः पटलः

आनन्दभैरवी उवाच

षट्चक्रभेदनार्थाय सर्वसिद्धसुसिद्धये ।
वक्ष्यामि लाकिनीदेवीस्तोत्रं परमदुर्लभम् ॥ ४९-१ ॥

यत्पाठादतिसन्तोषं प्राप्नोति यतिरीश्वर ।
तत्क्रियासारसम्पन्नं स्तवनं लाकिनीप्रियम् ॥ ४९-२ ॥

अस्य श्रीलाकिनीस्तोत्रस्य महाविष्णुकहोड-ऋषि-र्गायत्रीच्छन्दो
महासिद्धिदमृत्युञ्जयमहारुद्र लाकिनी सरस्वतीदेवता
मणिपूरभेदने जपे विनियोगः ॥

ओं बीजाक्षरमूर्तिमार्ति हरिणीमार्यां जयां बुद्धिदां
दीनानामपराधकोटिहननीं संज्ञामणिं योगिनाम् ।
त्वामाद्यामनुरागिणीं गुणगणामोदैकहेतुस्थलां
स्थित्यन्तःकृतकौतुकीमवरदे वन्दे मुदा लाकिनीम् ॥ ४९-३ ॥

हेरम्बार्चनसिद्धिदाद्वयगता कोटिप्रभा भास्करा
साकारा किरणोज्ज्वला सुखमयी वेदध्वनिप्राणिनी ।
कोपाकोपितलक्षणा तरुतराकल्पाशयासंशया
कृत्वैवं वरवर्णिनी समवतु श्रीलाकिनी कङ्किनी ॥ ४९-४॥

केयूरामलहारमालशुभगा वीरासना स्थायिनी
भार्या रुद्रपतेः प्रवालविमला वक्रोत्पलस्रग्धरा ।
माता योगवतां सती परा परपदा माध्वीरसाच्छादिता
त्वं मां पाहि कृपामयी यमगतं मृत्युञ्जये श्रीधरे ॥ ४९-५॥

आकाङ्क्षीकुलसङ्कुका क्षयकरी शत्रुप्रभादेर्दया
भक्तानामतिदुःखहा शशिमुखी योन्यानना कामुकी ।

कामस्थानमकामदोषशतकं शीघ्रं त्वलक्षेमदा
जीवन्मुक्तिपदं विधेहि समरे सर्गद्रुहस्य प्रियम् ॥ ४९-६ ॥

त्वं पञ्चाननपूजिता त्वमशिता त्वं बालविद्यागति-
स्त्वं सत्यं कवितासु वाक्यकविता त्वं केवलानन्ददा ।
त्वं लाक्षारुणरूपिणी त्वमवरा त्वं लिङ्गसंहारिणी
त्वं साक्षादमृतप्रदा त्वमजरा त्वं लाकिनी पातु माम् ॥ ४९-७॥

नानामङ्गलधर्मराज्यजडिता संस्कारबोधाश्रया
लिङ्गस्थाचलपुत्रिका नवगृहे सङ्क्रामयन्ती शिवा ।
मे लिङ्गोपरि रुद्रनाथ विपथव्याभेदनं सङ्गमं
शीघ्रं कारय देवि मोक्षतुरिकं कोटीव चन्द्रोज्ज्वला ॥ ४९-८॥

चन्द्राभासकलाश्रया श्रयति या शब्दच्छटा या समा
माया मोहभिदा दया दयति या कृष्णक्रिया मोहिनी ।
लक्ष्मीर्नीलकलेवरामलमणेः पूर्वं सदा रक्षतु
श्रीविद्या भयदायिनी त्वमपि सा मे नाभिमूलोदया ॥ ४९-९॥

मात्रा मुद्रामनननिलया मालिनी मन्त्रविद्या
विश्वेशानी शयनरहिता शीतवातातपस्था ।
सत्यासत्या वचनभवगा गौरि माता त्वमेव
प्राणान् रक्ष प्रथमकिरणामाश्रये त्वामनन्ताम् ॥ ४९-१०॥

सिद्धासिद्धा शशिरविकला केवलाम्भोजसंस्था
स्थित्यानन्दा नयनस्वचलाम्भोजमध्यप्रकाशा ।
नित्यं श्रद्धागतिपथकरा कर्त्री कामानहर्त्री
नाद्यस्तोत्रं भज भज भजे त्वामनन्तां स्वरूपे ॥ ४९-११॥

पीतापीता पवनगमना धारणध्यानयोगा
कालाकाला कलिकुलकला निष्कला ज्ञानरूपा ।
कृष्णानन्दा मदनकुहरा केकरा शङ्करी वा ।
त्वं श्रीधात्री धवलकमलं नाभिमूले प्रवक्ष्ये ॥ ४९-१२॥

श्वेता श्वेतारुणशतकरा भावनाज्ञानसिद्धिः
प्रीताप्रीता परमगहना चारुणामाननायाः ।
त्वं सा विद्या विधिबुधवरा धारणाज्ञानगम्या
रम्यारम्या रमणनिरता नीरदा पातु नाभिम् ॥ ४९-१३॥

मन्दोद्बन्धप्रियवधुलता नीरवानावहन्त्री
क्षेत्राक्षेत्रा परचरगता भुक्तिमुक्तिप्रकाशा ।
कौलाकौलाज्ञापितनयना गञ्जना वातमुग्धा
मुग्धामुग्धामतिधनपतेर्नाभिसंस्थेऽवनाभिम् ॥ ४९-१४॥

हंसी सिंहासनगतपदा चक्रविद्या सुसूक्ष्मा
श्रीविद्या त्वं नवविलचरा सुन्दरी रक्तवर्णा ।
स्वर्णाम्भोजोपरि शुभमना चक्रमध्ये प्रतिष्ठा
सर्वा वर्णा परिजनदयानाभिपद्मं च रक्षा ॥ ४९-१५॥

ब्रह्मानन्दा नृपगणमहापूजया शोभिताङ्गी
श्रीश्रीविद्यासकलविभवा भावनीया महेन्द्रैः ।
सिद्धस्थाने मणिमयगृहे मूलसिंहासनस्था
पद्मे चाष्टान्वितयुगदले नाभिमूलेममाव ॥ ४९-१६॥

योगज्ञानं द्विविधविभवं वेदविद्याप्रकाशं
मे चाष्टाङ्गं समवतु मुदा षोडशी भैरवस्था ।
चन्द्रोल्का त्वं भवभयहरा शोकतापापहन्त्री
नाभावब्जे उदयति सुरो यस्तमीशे प्ररक्ष ॥ ४९-१७॥

संशिष्टा त्वं विरत करुणे शीतले शीतशैले
साक्षादन्यप्रचयवचना पार्वणा पर्वपूरा ।
विद्युत्पूरं समसुखमयं पाहि पञ्चानना या
त्वं सा देवी शुभमणिगृहे शीतलत्वं विधेहि ॥ ४९-१८॥

छन्दोगानां सकलविषयच्छेदिनी चार्णमाता
माला लाक्षारुणकिरणभा गोपपूज्या गिरीज्या ।
मातस्त्वं मे स्वमणिभवनं पाहि सूक्ष्मा भवानी ।
वानस्थानाश्रय जय कराचाङ्गिरा चान्नपूर्णा ॥ ४९-१९॥

चन्द्रोल्लासाऽवयवसुखदा दीर्घकेशी विशाला
त्वं मातङ्गी जननि जगतां बालिका विप्रचण्डा ।
ज्योत्स्नाजाले उदयति सदा रक्तभाषप्रभासा
त्वं मे रुद्र हरिहरतनुं नाभिमूले प्ररक्ष ॥ ४९-२०॥

वाणीनाम्ना रचयति वचः सुन्दरी वर्णनस्था

स्थित्यन्तस्था चलतनुधरा धामसन्धामरा सा ।
बोधानन्दप्रकृतितनुभिर्व्यापिनी ज्ञानमुग्धा
मातस्त्वं मे मणिदलगृहं पाहि सर्वाङ्गविद्ये ॥ ४९-२१॥

विद्या चण्डामलसितसृजा चन्दनालिप्तदेहा
विश्वेशानि भगवति शिवे त्वं क्षयामोघरूपा ।
जाया शम्भोर्जटिलशिवगता मोक्षदा मानसंस्था
चित्तं शुभ्रं कुरु विषयछेदनं छेदिनि त्वम् ॥ ४९-२२॥

मणिमयकुलगेहे कोटिविद्युत्प्रकाशेऽ-
भयवरमपि देहि कोधविद्ये मयि त्वम् ।
सकलसुखविभोगं पालय प्राणरूपं
चरणतलविलग्नं मामनाथं परेशि ॥ ४९-२३॥

भुवनगहनहेतोः कायसर्गा विनास्ते
विधिमखसुरनाथं मानुषादि त्रिसर्गम् ।
मम मणिकुलपद्मे नित्यरूपाभिधानं
जयति खलु तदानीं स्तोत्रसारप्रकारम् ॥ ४९-२४॥

भवतु चरणपद्मे लाकिनी देवकन्ये
विरचय मनुशास्त्रं सिद्धमन्त्रप्रकारम् ।
वह वह भवभावं त्राहि मां चन्द्रगेहे
कठिनहृदयनाशं शङ्करि त्वं कुरुष्व ॥ ४९-२५॥

कमलवनसमीपे वन्यमध्येऽतिगुह्ये
विषयविषयिनाशं कौलिके त्वं विकृत्य ।
भवनिजमणिपीठे स्थापयित्वा निदानं
हर हरदयिते त्वं दोषषङ्कं विवादम् ॥ ४९-२६॥

घोरे सान्द्रान्धकारे मम निजकुलदृग्दानकर्त्रि प्रसन्ने
वाञ्छाकल्पद्रुमस्था त्वमिह कुशलदा दायभागाविभागा ।
त्वं काली नन्दिनीस्था नयकरुणघटा मध्यगा माघका त्वं
भीमा भीत्यापहन्त्री हरपदनयनो लाकिनी नाभिमाव ॥ ४९-२७॥

एतत्स्तोत्रं पठेद् विद्वान् योगज्ञानी निराश्रयः ।
महासुखगतो वीरो विभवायामृताय च ॥ ४९-२८॥

भोगमोक्षौ करे तस्य चैहिके योगिराड् भवेत् ।
परे याति महादेवी पादपद्मे न संशयः ॥ ४९-२९॥

ऐहिके चिरजीवित्वं ददाति कामदायिनी ।
मणिपूरे स्थितो याति कुलमार्गप्रसादतः ॥ ४९-३०॥

कुलमार्गेण यत्स्थानं लयं विश्वेश्वरीपदम् ।
तल्लया मणिपूरस्था देवता पश्यति ध्रुवम् ॥ ४९-३१॥

पूजान्ते प्रपठेत् स्तोत्रं भक्तिभावपरायणः ।
शीघ्रमेव हि योगी स्यात् कुलमार्गप्रसादतः ॥ ४९-३२॥

इति श्रीरुद्रयामले उत्तरतन्त्रे लाकिनीशस्तवनं नाम
एकोनपञ्चाशत्तमः पटलः ॥ ४९॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Shri Lakinidevi Stotram*
pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*